# गणितम्

## षष्ठ-कक्षायाः कृते पाठ्यपुस्तकम्

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्
NATIONAL COUNCIL OF EDUCATIONL RESEARCH AND TRAINING

मार्चमासः 2012 इत्यस्मात् संस्करणात्
अस्माभिः संस्कृतानुवादः कृतः ।

# आमुखः

राष्ट्रिय-पाठ्यचर्यायाः रूपरेखा (2005) बोधयति यत् छात्राणां विद्यालयजीवन-बाह्यजीवनयोः मध्ये सम्बन्धः प्रकल्पनीयः इति । सः सिद्धान्तः पुस्तकीय-ज्ञानस्य तस्याः परम्परायाः विपरीतम् अस्ति यत् यस्य प्रभावद्वारा अस्माकं व्यवस्था एतावत्पर्यन्तं विद्यालय-गृहयोः मध्ये महतः अन्तरस्य संरक्षणं करोति । नूतन- पाठ्यचर्या-आधारितः पाठ्यक्रमः पाठ्यपुस्तकं च अस्य पारम्परिक-विचारस्य उपरि अवधानं यच्छति । एषः तु पारम्परिक-रटना-प्रकारं परित्यज्य प्रत्येकम् अपि विषयस्य दृढ-भित्ति-निर्माणस्य प्रयत्नः अस्ति । आशा अस्ति यत् अयं प्रयत्नः बालकेन्द्रित-शिक्षणं प्रति अस्मान् नेष्यति इति ।

अस्य प्रयत्नस्य सफलता तु प्राचार्यैः शिक्षकैः च छात्राणाम् उत्साहवर्धनार्थं स्व-अनुभव-स्वाध्यायद्वारा अपि च स्व-कल्पनाद्वारा स्वीकरिष्यमाण-क्रमाणाम् उपरि एव वर्तते । अस्माभिः अङ्गीकर्तव्यं यत् यदि छात्रेभ्यः स्थानं,समयः स्वतन्त्रता च दीयते तर्हि ते ज्येष्ठानां साहाय्येन नूतनं ज्ञानम् आत्मसात् कुर्वन्ति । शिक्षणस्य आधारभूततत्त्वानां विविध-सामग्रीणां विचारान् परित्यज्य यत् पुस्तकनिर्माणं भवति तत्तु परीक्षानिमित्तमात्रम् अस्ति । सर्जनात्मकतायाः उपक्रमस्य विकासः तदा एव सफलो भवति यदा शिक्षकाः छात्राणां कृते ग्रहणस्य अर्जनस्य च अवसरं प्रदीयेरन् ।

एतानि उद्देश्यानि विद्यालयस्य दैनिकजीवनस्य कार्यप्रकारस्य च अधिकाधिक-परिवर्तनम् अपेक्षन्ते । दैनिकसमयसारिण्याः नमनीयता तथा स्यात् यथा शिक्षणस्य कृते यावन्ति दिनानि अपेक्षितानि इति मनसि निधाय वर्षिकसमयसारिणी निर्मिता भवेत् । शिक्षण-मूल्याङ्कन–विधयः अस्य अंशस्य निर्धारणं कुर्वन्ति येन पाठ्यपुस्तकेन छात्राः मानसिक-खिन्नतां, पठने च आलस्यं परित्यज्य सन्तोषकर-अनुभवं प्राप्नुयुः। बालमनोविज्ञानं मनसि निधाय छात्राणां भारानुभवस्य परिमार्जनार्थम् उपलब्ध-समयस्य-उपरि अवधानं दत्वा पुस्तकमिदं निर्मितमस्ति । पाठ्यपुस्तकमिदं एतत् प्रयत्नम् इतोऽपि अग्रे नेतुं छात्राणां चिन्तन-विचाराणां, विस्मयानां, लघुसमूहे वार्तालापानाम् एवं हस्तेन क्रियमाण-गतिविधीनां च प्राधान्यं प्रयच्छति ।

एन्.सी.ई.आर्.टी. अस्य पुस्तकस्य निर्माणार्थं निर्मित-समितेः परिश्रमस्य कृते कृतज्ञतां समर्पयति । पाठ्य-पुस्तक-परामर्श-समितेः अध्यक्षस्य प्रो.जयन्त विष्णु नारलीकर महोदयस्य कृते एवं च अस्य पुस्तकस्य मार्गदर्शकस्य डा.हृदयकान्त दीवान महोदयस्य कृते विशेषतः वयं कृतज्ञताम् अर्पयामः । अस्य पाठ्य-पुस्तकस्य विकासे नैकानां शिक्षकाणां योगदानं वर्तते अपि च तस्य उद्देश्यस्य परिपूर्तये तेषां प्राचार्याणाम् अपि योगदानम् अस्ति । अतः अत्र सर्वेषां कृते कृतज्ञतां व्याहरामः । यानि च सङ्घटनानि स्व-संसाधनद्वारा सामग्रीद्वारा सहयोगिनां द्वारा च औदार्येण साहाय्यं कृतवन्तः तेभ्यः सर्वेभ्यः कृतज्ञतां व्याहरामः । वयं विशेषतः माध्यमिक-उच्चतर-शिक्षाविभागः, मानव-संसाधन-विकास-मन्त्रालयद्वारा प्रो.मृणाल मिरी अपि च प्रो.जी.पी.देशपाण्डे महोदययोः आध्यक्षे नियुक्तायाः राष्ट्रिय-मानीटरिङ्ग-समितेः द्वारा प्रदत्तसमयस्य योगदानस्य च कृते कृतज्ञतां वदामः । व्यवस्थायाम् अपि च स्व-प्रकाशने निरन्तर-गुणात्मकतामानेतुं एन्.सी.ई.आर्.टी. सर्वदा भवतां मार्गदर्शनं टिप्पणीः च स्वागतीकरोति येन अग्रिम-संशोधने पुस्तक-निर्माणे च साहाय्यं भवेत् ।

निदेशकः
राष्ट्रिय-शैक्षिकानुसन्धानम् एवञ्च

नवदेहली
प्रशिक्षण
20 डिसेम्बर् 2005

# भारतीय-संविधानम्

## उद्देशिका

वयं भारतीयाः, भारतदेशम् एकं **[सम्पूर्ण-प्रभुत्व-सम्पन्नम्, समाजवादि, पंथ-निरपेक्षम्, लोकतन्त्रात्मक-गणराज्यं]** निर्मातुं तथा च तस्य समस्तनागरिकानां कृते;

सामाजिकम् आर्थिकं तथा च राजनैतिकं

न्यायम्, विचारस्य, अभिव्यक्तेः, विश्वासस्य,

धर्मस्य, उपासनायाः च **स्वतन्त्रताम्**, प्रतिष्ठायायाः

अवसरस्य च **समतां** प्रापयितुं तथा च तेषु **सर्वेषु**

मानवीयगौरवस्य तथा च **[राष्ट्रियैकतायाः**

**अखण्डतायाश्च] सुनिश्चयकर्त्रीं बन्धुतां**

**संवर्धयितुं**

दृढसंकल्पाः भूत्वा **अस्यां स्वसंविधानसभायाम्** अद्य नवम्बरमासस्य 26 तमे दिनाङ्के 1949 तमे ख्रीस्ताब्दे (मार्गशीर्षे शुक्लसप्तम्यां 2006 तमे विक्रमसंवत्सरे) **एतत् संविधानम् अङ्गीकुर्मः अधिनियमितं तथा च आत्मार्पितं कुर्मः ।**

# शिक्षाकाणां कृते टिप्पणी

अस्माकं जीवने गणितस्य बहु-महत्त्वं विद्यते । गणितं तु न केवलम् अस्माकं दैनिक-कार्येषु साहाय्यं करोति परं तर्कपूर्ण-विवेचनस्य, अमूर्तचिन्तनस्य कल्पनाशीलतायाः विकासे अपि साहाय्यं करोति । इदं समृद्धजीवनस्य तथा चिन्तनस्य नूतन-आयामानां परिचयं करोति । गहन-सिद्धान्तानां शिक्षणे सङ्घर्ष-तर्काणाम् अधिगमनस्य निर्माणस्य च बलं वर्धयति एवं सङ्कल्पनानां मध्ये परस्पर-सम्बन्ध-अवगमनार्थम् अपेक्षित-शक्तिं उत्पादयति । अस्माकं समृद्धं ज्ञानम् अन्यविषयाणाम् अवगमने अपि साहाय्यं करोति । परं प्रतिमानानां, मानचित्राणां, क्षेत्र-मूल्याङ्कनस्य आयतनस्य च अवगमनाय अथ आकृतेः आकारस्य च मध्ये स्थित-समानतायाः विषये ज्ञानम् अभिजनयति । गणितस्य व्याप्तिः तु अस्माकं जीवने तथा पर्यावरणे च प्रसृता अस्ति । सम्भावितेषु सर्वविधक्षेत्रेषु अस्य सम्बन्धस्य प्रकाशनम् अनिवार्यम् अस्ति ।

गणित-शिक्षणस्य तात्पर्यं न केवलं समस्यानां समाधानस्य रटनं किन्तु कथं च तासां समस्यानां समाधानकरणम् इत्यस्य अवगमनम् अपि वर्तते । वयं तु आशास्महे यत् भवन्तः शिक्षकाः स्व-छात्राणां कृते स्वयमेव प्रश्न-निर्माणे प्राचुर्येण अवसरं दद्युः इति । वयं विश्वसिम अयम् एकः उत्तम विचारः भविष्यति यत् यावत्पर्यन्तं छात्राः प्रश्नं कर्तुं पारयेयुः तावत्पर्यन्तं छात्रेभः अनेकानेक-प्रश्न-निर्माणार्थम् अवसरः प्रदीयेत । इयं प्रक्रिया छात्राणां कृते गणित-सिद्धान्तानां सम्भावनानां च विकासकर्मणि साहाय्यं करोति । यथा यथा ते आगतानां समस्यानां विषये आत्मविश्वासं प्रदर्शयन्ति तथा तथा ते विविधतापूर्णानां जटिल-समस्यानां निर्माणे अपि समर्थाः भविष्यन्ति ।

गणित-कक्ष्या तु जीवपूर्णा आकर्षणीया च स्यात् यत्र छात्राः स्व-ज्ञानस्य सङ्कल्पनानां सुस्पष्टतां प्राप्नुवन्ति, प्रतिकृतीनां (मॉडेल्) निर्माणे स्पष्टकल्पनां प्राप्नुवन्ति, परिभाषाणां विकासं लभन्ते च । भाषा-गणिताधिगमयोः मध्ये दृढतर-सम्बन्धः वर्तते परं च कक्ष्यायां छात्राणां कृते गणित-सम्बन्धि-विचाराणां विषये भाषणार्थं सम्पूर्ण-अवसरः प्रकल्प्येत एवं कक्ष्यायां सम्भविष्यमाण-सर्वविध-परिचर्यया सह छात्रानुभवानां संयोजनमपि करणीयम् ।

प्रथमं तावत् तेषां कृते स्व-भाषाणाम् उपयोगे अवरोधः न कर्तव्यः किन्तु शनैः शनैः औपचारिकभाषायाः स्थापनम् अपि अनिवार्यं भवति । विद्यालयेऽपि प्रत्येकम् अवसरः अवकाशश्च सुनिश्चितः स्यात् यत्र छात्राः पाठ्य-पुस्तके अधीतविषयेषु प्राप्त-स्वानुभव-सुविचाराणाम् आदान-प्रदानादिकं कुर्युः । समूहे पुस्तकपठनस्य अवसरः भवेत् अपि च तेन छात्रः कीदृशविचारस्य अवधारणं कृतवान् इत्यस्यापि प्रकटनं कर्तुं प्रोत्साहः प्रदेयः ।

गणितस्य कृते अमूर्तकल्पनानाम् आवश्यकता भवति । गणितं तु वैशिष्ट्यपूर्ण-विद्या अस्ति यया छात्रः तर्कपूर्ण-विवेचनाधारितं परिणामं प्राप्य सूत्रे योजयति प्रमाणयति च । सारांशे पठितुं प्रथमतः छात्राणां कृते दृढतर-अध्ययन-सामग्रीणाम्, अनुभवानां तथा ज्ञात-पाठानाम् आवश्यकता भवति । तेषां कृते तादृश-वस्तूनि देयानि किन्तु एतदपि अवधेयं यत् ते तेषामेव वस्तूनाम् उपरि सर्वदा अवलम्बिताः मा भवेयुः । एतत्तु स्पष्टमस्ति यत् पुस्तकमिदं साक्ष्य-परीक्षणयोः मध्ये अन्तरं बोधयति । द्वयमपि एतद् भ्रमजनकम् अस्ति इति वयं एतयोर्मध्ये अन्तरं रक्षितुं प्रयतामहे ।

अत्र तु बहवः एतादृश-अवसराः प्रदत्ताः सन्ति यत्र छात्राः सिद्धान्तानां प्रतिमानानां च परीक्षणं करिष्यन्ति तथा अपवादभूतानाम् अंशानाम् अन्वेषणे अपि समर्थाः भविष्यन्ति । अत एव यत्र एकस्मिन्

पक्षे वयं छात्राणां पक्षतः आशास्महे यत् ते प्रतिमानं अवलोकयेयुः तथा सूत्रबद्धं कुर्युः तत्रैव अपरस्मिन् पक्षे ते सूत्रबद्धतायाम् अपवादं जानीयुः एवं नूतनपरिष्ठितौ प्रतिमानानां व्यापकतां, तेषां वैधता-अन्वेषणं कुर्युः । गणितविचाराणाम् अध्ययनस्य इदमपि एकम् अनिवार्यम् अङ्गं भवति, अतः यदि भवन्तः एवं स्थानं प्राप्नुवन्ति यत्र छात्राणाम् कृते एतादृशाः अभ्यासाः भवितुम् अर्हन्ति तर्हि एतत् उपयोगितापूर्णं भविष्यति। स्वयमेव समस्यानां समाधानम् अन्विष्य प्राप्त-समाधानानां प्रदर्शनमपि कर्तुं बहवः अवसराः प्रदेयाः भवन्ति । वयं तु आशास्महे यत् भवन्तः छात्रेभ्यः तादृश-अवसरान् प्रदास्यन्ति यैः ते विभिन्नविचाराणां विषये तर्कपूर्ण-समर्थनं प्रदद्युः पुनः ते समर्थनस्य अनुपालनं कुर्युः अपि च समर्थने या कापि न्यूनता भवति तस्याः अपि शोधनं कर्तुं समर्थाः भवेयुः । इदं प्रामुख्यं भवति यत् तेषाम् अन्तरङ्गे किञ्चित् प्रमाणयितुं यत् ज्ञानमपेक्षितं तस्य ज्ञानस्य क्षमता-उत्पादनं तथा सन्निहित-सङ्कल्पनानां विषये आत्मविश्वासः वर्धेत ।

अपेक्षा अस्ति यत् भवतां गणित-कक्ष्या पुरातन-समस्यानाम् उत्तरस्य अन्वेषणमात्रं न बोधयेत् किन्तु नूतन-नूतन-विषयाणां गवेषणं तथा तेषु क्रियात्मकतां समुत्पादयेत् । गणितकक्ष्या सर्वदा अपि ज्ञात-विषयाणाम् अन्धानुकरणार्थं नास्ति परन्तु समस्यानां समाधानं कर्तुं नूतन-मार्गाणाम् अन्वेषणार्थं वर्तते । समस्यानां समाधानार्थं पर्याय-क्रमावलीः नूतनतन्त्रान् च आत्मसात् कर्तुं प्रोत्साहः देयः । भवन्तः अपि एतादृशानां समस्यानां योजनं कर्तुं प्रभवन्ति याः समाधातुं विविधमार्गाः भवन्ति यासां साहाय्येन छात्राः गणितम् अवगन्तुम् इतोऽपि स्फूर्तिं प्राप्नुवन्ति ।

सर्वेषाम् अध्यायानां मध्ये एकस्मात् अपरं प्रति सम्बन्धं रक्षितुं वयमत्र प्रयत्नं कृतवन्तः । एवं च पूर्वतन-अध्यायेषु अधिगतानाम् अंशानां अग्रिम-अध्यायस्य विचारारम्भणार्थं प्रयोगं कृतवन्तः । वयम् आशास्महे यत् भवन्तः उत्तम-अवसररूपेण अस्य प्रयोगं करिष्यन्ति अपि च उत्तरोत्तर-अभिवृद्ध्यर्थं तासाम् अवधारणानां संशोधनं करिष्यन्ति यासां कारणेन छात्राः गणितस्य सम्पूर्ण-सङ्कलनात्मक-संरचना-अवबोधने शक्ताः भवेयुः । कृपया भवन्तः ऋणात्मकसंख्याः, भिन्नाः, चराः इत्याद्याः यत् छात्राणां कृते नूतनविचाराः सन्ति तेषां प्रयोगार्थं अधिकाधिकसमयं यच्छन्तु । एषु बहवः अंशाः गणितं सम्यगध्येतुं आधारभूताः अंशाः भवन्ति ।

वयं विश्वसिम यत् अस्य पुस्तकस्य पठनेन छात्राः सन्तोषम् अनुभवन्ति इत्यतः ते प्रतिमानानां सूत्रबद्धकरणे तथा समस्यानां गवेषणे च स्वयमेव आसक्ताः भविष्यन्ति । ते गणितविषये भयं परित्यज्य आत्मविश्वसेन पठन्ति एवं च अध्ययने चर्चामाध्यमेन परस्परं साहाय्यमपि कुर्वन्ति । एतेन सह वयं आशस्महे यत् भवन्तः अपि छात्राणां कृते अवधानपूर्वकं श्रवणार्थं समयम् आविष्कुर्वन्ति तथा छात्राणां पुरतः यः विषयः अवधानेन वक्तव्यः इत्यंशमपि चिन्तयन्ति इति । एतेन सह छात्राः स्व-विचारान् स्पष्टयितुं तथा तेषां चिन्तनस्य शाब्दिक-अभिव्यक्तीकरणार्थं वा क्रियारूपेण योजयितुं वा अवसरं प्रकल्पयन्ति । अस्य पुस्तकस्य विषये ये केऽपि विचाराः परामर्शाः वा भवन्तु तान् सर्वान् वयं स्वागतीकुर्मः अपि च आशास्महे यत् भवन्तः यान् रोचक-अभ्यासान् प्रेषयिष्यन्ति यैः छात्रविकासः सञ्जायेत तान् वयम् अग्रिम-पुस्तकसंस्करणकाले योजयितुं शक्ष्यामः ।

# पाठ्यपुस्तकनिर्मातृसमितिः

**पाठ्यपुस्तकविकाससमितिः**

अध्यक्षः, विज्ञान-गणित-परामर्श-समितिः

जे.वी.नारलीकरः, इमिरिटस्-प्रोफेस्सर्, इण्टर्-यूनिवर्सिटी सेण्टर् फार् आस्ट्रोनोमि एण्ड् आस्ट्रोफिजिक्स्
(आय्.यू.सी.सी.ए.), गणेशखिण्डः, पुणे युनिवर्सिटी, पुणे

**मुख्यः परामर्शकः**

डा॥ एच्.के.दीवन , विद्यभवन-सोसैटी, उदयपुरम्, राजस्थानम्

**मुख्यः समन्वयकः**

हुकुम् सिंहः, प्रोफेसर्, डी.ई.एस्.एम्. , एन्.सी.ई.आर्.टी. , नवदेहली

**सदस्याः**

अञ्जली गुप्ते, अध्यापिका, विद्याभवन-पब्लिक्-स्कूल्, उदयपुरम्, राजस्थानम्

अवन्तिका दाम, टी.जी.टी, सी.आय्.ई एक्स्पेरिमेण्टल् बेसिक् स्कूल्, डिपार्टमेण्ट् आफ् एजुकेशन्, देहली

धर्मप्रकाशः, रीडर्, सी.आय्.ई.टी., एन्.सी.ई.आर्.टी. , नवदेहली

एच्.सी.प्रधानः, प्रोफेसर्, होमीबाबा सेण्टर् फार् सैन्स् एजुकेशन्, टी.आय्.एफ्.आर्., मुम्बै, महाराष्ट्रम्

हर्ष जे. पटाडिया, सीनियर् रीडर्, सेण्टर् आफ् अद्वान्स् स्टडी इन् एजुकेशन्, एम्.एस्. यूनिवर्सिटी आफ् बरोडा, वडोदरा, गुजरात्

जबाश्री घोष्, टी.जि.टी, डि.एम्.स्कूल्, आर्.आय्.ई, एन्.सी.ई.आर्.टी. भुवनेश्वरः, ओडिशा

महेन्द्र शङ्करः, लेक्चरर्(एस्.जी)(अवकाशप्राप्तः), एन्.सी.ई.आर्.टी., नवदेहली

मीना श्रीमाली, अध्यापिका, विद्याभवन सीनियर् सेकेण्डरी स्कूल्, उदयपुरम्, राजस्थानम्

आर्.आत्मारामन्, मेथमेटिक्स् एजुकेशन् कन्सल्टण्ट्, टी.आय्.मेट्रिक् हैयर् सेकेण्डरी स्कूल् एण्ड् ए.एम्.टी.आय्, चेन्नै, तमिलुनाडु

एस्.पट्टनायकः, प्रोफेसर्, इन्स्टिट्यूशन् आफ् मेथमेटिक्स् एण्ड् अप्लिकेशन्, भुवनेश्वरः, ओडिशा

एस्.के.एस्.गौतमः, प्रोफ़ेसर्, डी.ई.एस्.एम्., एन्.सी.ई.आर्.टी. नवदेहली

श्रद्धा अगरवाल्, पी.जी.टि, सर् पदम्पत् सिङ्घानिया एजुकेशन् सेण्टर्, कानपुरम्, (उ.प्र.)

सृजाता दासः, सीनियर् लेक्चरर् (मेथमेटिक्स्), एस्.सी.ई.आर्.टी, नवदेहली

यू.बी.तिवारी, प्रोफेसर्, डिपार्टमेण्ट् आफ् मेथमेटिक्स्, आय्.आय्.टी, कानपुरम् (उ.प्र.)

उदय सिंहः, लेक्चरर्, डी.ई.एस्.एम्, एस्.सी.ई.आर्.टी, नवदेहली

सदस्य-समन्वयकाः

आशुतोश के. वाझालवरः, प्रोफेसर्, डी.ई.एस्.एम्, एस्.सी.ई.आर्.टी, नवदेहली

प्रवीण के. चौरासिया, लेक्चरर्, डी.ई.एस्.एम्, एस्.सी.ई.आर्.टी, नवदेहली

संस्कृत-अनुवादकः ?

# कृतज्ञताज्ञापनम्

पुस्तकस्य अन्तिमस्वरूपाय आयोजितायाः कार्यशालायाः निम्नलिखितानां प्रतिभागिनां बहूमूल्यीयानां टिप्पणीनां विषये परिषद् कृतज्ञतां प्रकटयति। दीपकः मन्त्री, विद्याभवनम्, बेसिक-विद्यालयः उदयपुरं राजस्थानम्; शगुफ्ता अञ्जुमः, विद्याभवनं वरिष्ठमाध्यमिकविद्यालयः उदयपुरम्, राजस्थानम्, रञ्जना शर्मा, विद्याभवनं वरिष्ठमाध्यमिक-विद्यालयः उदयपुरं राजस्थानम् । परिषद् एस.सी.ई.आर.टी., छत्तीसगढम्, रायपुरस्य श्रीमता उत्पलचक्रवर्तिना प्रदत्तान् परामर्शान् प्रति तस्य कृतज्ञतां व्यक्तीकरोति।

परिषद् पाठ्यपुस्तकसमीक्षायै आयोजितायां कार्यशालायां भागगृहीतृणां निम्नलिखितानां प्रतिभागिनां बहुमूल्याय सहभागाय हार्दिकं कार्तज्ञं प्रकटयति । के.बालाजी, केन्द्रीयविद्यालयः, दोनी मलाई, कर्णाटकम्; शिवकुमारः निमेशः, टी.जी.टी., राजकीय-सर्वोदयबालविद्यालयः, दिल्ली; अजयसिंहः, टी.जी.टी., रामजस-वरिष्ठमाध्यमिकः विद्यालयः क्रमाङ्कः ०३, दिल्ली; शुचीगोयलः, हरियाणा; डा.प्रतापसिहः रावतः, प्रवक्ता, एस.सी.ई.आर.टी., गुरुग्रामः ।

उदयपुरे आयोजितायां पाठ्यपुस्तक-विकास-समितेः तृतीयायां कार्यशालायां सौविध्यानि संसाधनानि च प्रदातुं परिषद् विद्याभवनम्, सोसायटी, उदयपुरम् इत्यस्य तथा च संकायसदस्यानां कृतज्ञा अस्ति। पुस्तकालयस्थाय साहाय्याय निदेशकः विज्ञानशिक्षाकेन्द्रस्य एवं च शिक्षा (C-SEC) दिल्लाविश्वविद्यालयः इत्येतं प्रति अपि परिषद् कृतज्ञतां प्रकटयति।

परिषद् एन.सी.ई.आर.टी. इत्यत्र हिन्दीरूपान्तरणस्य पुनरावलोकनाय आयोजितायां कार्यशालायां निम्नभागिनां बहुमूल्यीयानां टिप्पणीनां कृते कृतज्ञा अस्ति । अजयकुमारसिंहः, रामजस-वरिष्ठ-माध्यमिकः विद्यालयः क्रमाङ्कः ०३ चान्दनीचतुष्पथम्, दिल्ली; बी.एम.गुप्ता, डायरेक्टरेट् ऑफ् शिक्षा, दिल्ली (अवकाशप्राप्तः)।

अस्य पाठ्यपुस्तकस्य संशोधितायाः आवृत्तेः हिन्दीरूपान्तरणाय परिषद् महेन्द्रशङ्करः, प्रवक्ता (सिलेक्शनग्रेड) (अवकाशप्राप्तः), एन.सी.ई.आर.टी.नवदेहल्याः प्रति कृतज्ञतां ज्ञापयति।

शैक्षिकाय प्रशासनिकाय च साहाय्याय परिषद् प्रोफेसर् हुकुमसिंहः, विभागप्रमुखः, डी.ई.एस. एम., एन.सी.ई.आर.टी. इत्यस्य अपि कृतज्ञा अस्ति । एतत् अतिरिच्य परिषद् सरिता किमोठी, नरेशकुमारः विजयकौशलः डी.टी.पी. ऑपरेटर्; अवधकिशोरः सिंहः, पुस्तकसम्पादकः, एन.सी.ई.आर.टी इत्येतेषाम् एवं च प्रशासनस्य प्रकाशनविभागस्य च साहाय्याय हार्दं कार्तज्ञ्यं प्रकटयति।

# भारतस्य संविधानम्

भागः-3 ( अनुच्छेदः 12-35 )

( अनिवार्य-नियमः , कश्चिदपवादः तथा युक्तियुक्तनिर्बन्धाधीनः )

द्वारा प्रदत्तः

## मूलभूत-अधिकारः

**समताया अधिकारः**

- विधेः समक्षं तथा विधीनां समानं संरक्षणम्
- धर्मस्य, मूलवंशस्य, जातेः, लिंगस्य अथवा जन्मस्थानस्य आधारे
- लोकनियोजन-विषये
- अस्पृश्यतायाः उपाधीनाञ्च अन्तः

**स्वातन्त्र्य-अधिकारः**

- अभिव्यक्तेः, सम्मेलनस्य, संघस्य, सञ्चरणस्य, निवासस्य, वृत्तेश्च स्वातन्त्र्यम्
- अपराधानां कृते दोष-सिद्धि-सम्बन्धे संरक्षणम्
- प्राणानां दैहिक-स्वतन्त्राणाञ्च संरक्षणम्
- षड्तः चतुर्दशवर्षपर्यन्तानां बालानां कृते निःशुल्क-अनिवार्य-शिक्षा
- कासुचित् दशासु बन्धनात् निरोधनाच्च संरक्षणम्

**शोषणविरुद्धाधिकारः**

- मानवानां दुर्व्यापारस्य बलपूर्वकश्रमस्य च प्रतिषेधः
- परिसंकटमयकार्येषु बालानां नियोजन-प्रतिषेधः

**धर्मस्य स्वातन्त्र्य-अधिकारः**

- अन्तःकरणस्य तथा धर्मस्य अबाधरूपेण आमाननस्य, आचरणस्य, प्रचारस्य च स्वतन्त्रता
- धार्मिककार्याणां प्रबन्धस्य स्वतन्त्रता
- कस्यापि विशिष्ट-धर्मस्य अभिवृद्धये करदान-सम्बन्धे स्वतन्त्रता
- राज्यनिधितः पूर्णतः पोषित-शिक्षासंस्थासु, धार्मिक-शिक्षायां, धार्मिक-उपासनायाञ्च उपस्थिति-सम्बन्धे स्वातन्त्रता

**संस्कृति-शिक्षा-सम्बन्धाधिकारः**

- अल्पसंख्यक-वर्गाणां स्वभाषा-लिपि-संस्कृति-विषयकाणां हितानां संरक्षणम्
- अल्पसंख्यक-वर्गद्वारा स्वशिक्षा-संस्थानानां स्थापनं प्रशासनञ्च

**संवैधानिक-उपचाराणाम्-अधिकारः**

- उच्चतम-न्यायालयस्य , उच्च-न्यायालयस्य च निर्देशम् आदेशम् अथवा रिटद्वारा प्रदत्त-अधिकारं प्रवर्तयितुम् उपचारः